# Vasantakamapsarasakritam Naranarayana Stotram

# વસન્તકામાપ્સરસકૃતં નરનારાયણસ્તોત્રમ્

## Document Information

Text title : Vasantakamapsarasakritam Naranarayana Stotram 4

File name : vasantakAmApsarasakRRitaMnaranArAyaNastotram.itx

Category : vishhnu, vishnu, skandapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : skandapurANa | AvantyakhaNDa | revAkhaNDa | adhyAya 192/46-58||

Latest update : July 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 6, 2025

*sanskritdocuments.org*

# વસન્તકામાપ્સરસકૃતં નરનારાયણસ્તોત્રમ્

વસન્તકામાપ્સરસ ઊચુઃ ।
પ્રસીદતુ જગદ્ધાતા યસ્ય દેવસ્ય માયયા ।
મોહિતાઃ સ્મ વિજાનીમો નાન્તરં વિદ્યતે દ્વયોઃ ॥ ૪૬॥

પ્રસીદતુ સ વાં દેવો યસ્ય રૂપમિદં દ્વિધા ।
ધામભૂતસ્ય લોકાનામનાદેરપ્રતિષ્ઠતઃ ॥ ૪૭॥

નરનારાયણૌ દેવૌ શઙ્ખચક્રાયુધાવુભૌ ।
આસ્તાં પ્રસાદસુમુખાવસ્માકમપરાધિનામ્ ॥ ૪૮॥

નિધાનં સર્વવિદ્યાનાં સર્વપાપવનાનલઃ ।
નારાયણોઽતો ભગવાન્ સર્વપાપં વ્યપોહતુ ॥ ૪૯॥

શાર્ઙ્ગચિહ્નાયુધઃ શ્રીમાનાત્મજ્ઞાનમયોઽનઘઃ ।
નરઃ સમસ્તપાપાનિ હતાત્મા સર્વદેહિનામ્ ॥ ૫૦॥

જટાકલાપબદ્ધોઽયમનયોર્નઃ ક્ષમાવતોઃ ।
સૌમ્યાસ્યદૃષ્ટિઃ પાપાનિ હન્તું જન્માર્જિતાનિ વૈ ॥ ૫૧॥

તથાઽઽત્મવિદ્યાદોષેણ યોઽપરાધઃ કૃતો મહાન્ ।
ત્રૈલોક્યવન્દ્યૌ યૌ નાથૌ વિલોભયિતુમાગતાઃ ॥ ૫૨॥

પ્રસીદ દેવ વિજ્ઞાનઘન મૂઢદૃશામિવ ।
ભવન્તિ સન્તઃ સતતં સ્વધર્મપરિપાલકાઃ ॥ ૫૩॥

દૃષ્ટ્વૈતન્નઃ સમુત્પન્નં યથા સ્ત્રીરત્નમુત્તમમ્ ।
ત્વયિ નારાયણોત્પન્ના શ્રેષ્ઠા પારવતી મતિઃ ॥ ૫૪॥

તેન સત્યેન સત્યાત્મન્પરમાત્મન્સનાતન ।
નારાયણ પ્રસીદેશ સર્વલોકપરાયણ ॥ ૫૫॥

પ્રસન્નબુદ્ધે શાન્તાત્મન્પ્રસન્નવદનેક્ષણ ।

પ્રસીદ યોગિનામીશ નર સર્વગતાચ્યુત ॥ ૫૬॥

નમસ્યામો નરં દેવં તથા નારાયણં હરિમ્ ।
નમો નરાય નમ્યાય નમો નારાયણાય ચ ॥ ૫૭॥

પ્રસન્નાનામનાથાનાં તથા નાથવતાં પ્રભો ।
શં કરોતુ નરોઽસ્માકં શં નારાયણ દેહિ નઃ ॥ ૫૮॥

ઇતિ શ્રીસ્કન્દપુરાણે આવન્ત્યખણ્ડે રેવાખણ્ડે દ્વિનવત્યધિક-
શતતમાધ્યાયાન્તર્ગતં વસન્તકામાપ્સરસકૃતં નરનારાયણસ્તોત્રં
સમાપ્તમ્ ।

સ્કન્દપુરાણ । આવન્ત્યખણ્ડ । રેવાખણ્ડ । અધ્યાય ૧૯૨/૪૬-૫૮॥

skandapurANa . AvantyakhaNDa . revAkhaNDa . adhyAya 192/46-58..

Proofread by PSA Easwaran

*Vasantakamapsarasakritam Naranarayana Stotram*
pdf was typeset on July 6, 2025

Please send corrections to *sanskrit@cheerful.com*